# मातृ पंचकं

मुक्तामणिस्त्वं नयनं सुमेति
राजेति जीवेति चिरं सुत त्वं
इत्युक्तवत्या स्तववाचि मातः
ददाम्यहं तंडुलमेव शुष्कम् ॥ 1

अंबेति तातेति शिवेति तस्मिन्
प्रसूति काले यदवोच उच्यैः
कृष्णेति गोविंद हरे मुकुंदे
त्यहो जनन्यै रचितोयमंजलिः ॥ 2

आस्तां तावदियं प्रसूति समये
दुर्वार शूलव्यथा नैरुच्यं
तनु शोषणं मलमयी
शय्याच संवत्सरी
एकस्यापि न गर्भभार
भरण क्लेशस्य यस्याक्षमः
दातुं निष्कृति मुन्नतोपि
तनय: तस्यै जनन्यै नमः ॥ 3

© 2022 Vedam Nadam

गुरुकुलमुप सृ त्यस्सप्न काले तु दृष्ट्वा
यति समुचितवेषं प्रारुदो त्वमुच्चॆः
गुरुकुलमथ सर्व॰ प्रारुदत्ते समक्षं
सपदि चरण योस्ते मातरस्तु प्रणामः ॥ 4

न दत्तं मातस्ते
मरण समये तोयमपिवा
स्व धा वा नो दत्ता
मरण दिवसे श्राद्धविधिना
न जप्त्वा मातस्ते मरण समये
तारक मनुरकाले संप्राप्ते मयि
कुरु दयां मातुरतुलाम् ॥ 5

॥ इति श्रीमच्छंकर भगवत्पाद कृतं मातृ पंचकं संपूर्णम् ॥

© 2022 Vedam Nadam 